# .. bindumAdhavAShTakam ..

# ॥ बिन्दुमाधवाष्टकम् ॥

## Document Information

Text title : bindumAdhavAShTakam

File name : bindumaadhava8.itx

Category : aShTaka

Location : doc_vishhnu

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : January 13, 2005

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ बिन्दुमाधवाष्टकम् ॥

श्री गणेशाय नमः ।
कलिन्दजातटाटवीलतानिकेतनान्तर-
प्रगल्भवल्लविस्फुरद्रतिप्रसङ्गसङ्गतम् ।
सुधारसार्द्रवेणुनादमोदमाधुरीमद-
प्रमत्तगोपगोव्रजं भजामि बिन्दुमाधवम् ॥ १॥

गदारिशङ्खचक्रशार्ङ्गभृच्चतुष्करं कृपा-
कटाक्षवीक्षणामृताक्षितामरेन्द्रनन्दनम् ।
सनन्दनादिमौनिमानसारविन्दमन्दिरं
जगत्पवित्रकीर्तिदं भजामि बिन्दुमाधवम् ॥ २॥

दिगीशमौलिनूत्नरत्ननिःसरत्प्रभावली-
विराजितांघ्रिपङ्कजं नवेन्दुशेखराब्जजम् ।
दयामरन्दतुन्दिलारविन्दपत्रलोचनं
विरोधियूथभेदनं भजामि बिन्दुमाधवम् ॥ ३॥

पयः पयोधिवीचिकावलीपयःपृषन्मिलद्भुजङ्ग-
पुङ्गवाङ्ककल्पपुष्पतल्पशायिनम् ।
कटीतटिस्फुटीभवत्प्रतप्तहाटकाम्बरं
निशाटकोटिपाटनं भजामि बिन्दुमाधवम् ॥ ४॥

अनुश्रवापहारकावलेपलोपनैपुणी-
पयश्चरावतारतोषितारविन्दसम्भवम् ।
महाभवाब्धिमध्यमग्नदीनलोकतारकं
विहङ्गराड्तुरङ्गमं भजामि बिन्दुमाधवम् ॥ ५॥

समुद्रतोयमध्यदेवदानवोत्क्षिपद्धरा-
धरेन्द्रमूलधारणक्षमादिकूर्मविग्रहम् ।
दुराग्रहावलिप्तहाटकाक्षनाशसूकरं
हिरण्यदानवान्तकं भजामि बिन्दुमाधवम् ॥ ६॥

विरोचनात्मसम्भवोत्तमाङ्गकृत्पदक्रमं
परश्वधोपसंहृताखिलावनीशमण्डलम् ।
कठोरनीलकण्ठकार्मुकप्रदर्शितादि-
दोर्बलान्वितक्षितीसुतं भजामि बिन्दुमाधवम् ॥ ७॥

यमानुजोदकप्रवाहसत्त्वराभिजित्वरं
पुरासुराङ्गनाभिमाननूपभूपनायकम् ।

स्वमण्डलाग्रखण्डनीययावनारिमण्डलं
बलानुजं गदाग्रजं भजामि बिन्दुमाधवम् ॥ ८॥

प्रशस्तपञ्चचामराख्यवृत्तभेदभासितं
दशावतारवर्णनं नृसिंहभक्तवर्णितम् ।
प्रसिद्धबिन्दुमाधवाष्टकं पठन्ति ये भृशं
नरा सुदुर्लभं भजन्ति ते मनोरथं निरन्तम् ॥ ९॥

॥ इति श्रीबिन्दुमाधवाष्टकं सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

.. bindumAdhavAShTakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*